पारमात्मिकोपनिषत्

పారమాత్మికోపనిషత్

(శ్రీ వైఖానసభగవచ్ఛాస్త్రము లోనిది)



ప్రచురణ

శ్రీ మరీచి గ్రంథమాల

శ్రీ వైఖానస దివ్య సిద్ధాన్త వివర్ధినీ సభ, తిరుమల

1998

హరిః ఓమ్

శ్రీవేంకటేశాయ నమః

पारमात्मिकोपनिषत्

పారమాత్మికోపనిషత్



ప్రచురణ

శ్రీ మరీచి గ్రంథమాల

శ్రీ వైఖానస దివ్య సిద్ధాన్త వివర్ధనీ సభ, తిరుమల

1998

పారమాత్మికోపనిషత్

Pāramātmikopanishad

Sri Marichi Grandha Mala Series No. 8
First Edition : 1998
Copies : 1000
Price : Rs. 5/-

For copies :
Secretary
Sri Vaikhanasa Divya Siddhanta Vivardhini Sabha
Sri Vikhanasa Asramam
Ring Road
TIRUMALA - 517 504

Printed at :
VANI PRESS
Seshadri Sastri Street,
VIJAYAWADA - 520 002.

FOREWORD

Sri Vaikhanasa Divya Siddhanta Vivardhini Sabha expresses its hapiness to publish the text of **Pāramātmika Upanishad**. This Upanishad is very popular among **Vaikhanasas**. It is not found in the list of 108 upanishads.

In Vimanarchanakalpa of Sage Marichi the details of this Upanishad Mantras and their utilisation during Homa are explained in chapter thirty two.

अधातः पारमात्मिकानुक्रमणं व्याख्यास्यामः

There are 11 Anuvakas in this Upanishad. For each Anuvaka there are ten Mantras (from 1 to 10) and in eleventh Anuvaka there are five Mantras. In total there are 105 Mantras.

"विष्णुस्सर्वेषामित्यादि पञ्चोत्तरशतं पारमात्मिकं" इति विज्ञायते।

In Vaikhanasa Mantra Prasna the Pāramātmika Upanishad is given as the seventh Prasna of the text.

There is a Sanskrit commentary by Bhatta Bhaskara for this Upanishad. Later on Sri Srinivasa Makhi had written a detailed commentary for these Mantras. Sri Ilathuru Sundara Raja Bhattacharya had written further commentary known as Chandrika to Sreenivasa Makhi's Sanskrit commentary.

The Pāramātmika Upanishad with commentaries was published in 1900 in Grandha script at Tirukkudandai. In 1933 the text was published by Adyar Library Madras in Devanagari Script as one of the unpublished upanishads. In 1948 Sri Vaikhanasa Bhagavacchastra Grandha Mala, Nallur has published this text with Sanskrit commentaries in Telugu Script. Subsequently only the text portion of the upanishad was published by Vaikhanasas in Telugu Script.

To make the Upanishad text available to all the people, SVDSV Sabha is now publishing it in Devanagari Script. The Mantras of this Upanishad are being used separately at several places in Vaikhanasa Bhagavat Sastras written by Sages Marichi, Bhrugu, Kasyapa and Atri while performing the worship to Lord Vishnu.

Hope the book will be received by all the people and encouragement will be given to the activities of this Sabha.

We are thankful to Pandita Sri Parasaram Venkata Ramanacharyulu, Vijayawada and to Sri A. Rangacharyulu garu, Vanipress, Vijayawada for their help in bringing out this publication.

D. VIKHANASACHARY
Secretary
Sree Vaikhanasa Divya Siddhanta
Vivardhini Sabha

Tirumala
11-8-98

VAIKHANASA AGAMA BOOKS
T.T.D. PUBLICATIONS

		Rs. P
★	1. VIMĀNARCHANAKALPA	46–00
★	2. SAMURTĀRCHANĀDHIKĀRA	.....
	3. PRAKEERNĀDHIKĀRA	90–00
	4. YAJNĀDHIKĀRA	55–00
★	5. KHILĀDHIKĀRA	90–00
★	6. KRIYĀDHIKĀRA	90–00
	7. VASĀDHIKĀRAM	60–00
★	8. KĀSYAPA JNĀNAKĀNDA	36–00
★	9. VAIKHĀNASA GRUHYA SUTRA –PART 1 with commentary by Srinivasa Deekshita	49–00
	10. VAIKHĀNASA ĀGAMAM	.....
	11. ARCHANĀ TILAKAM	15–00
	12. ARCHANĀ NAVANEETAM	20–00
	13. SRI VAIKHĀNASA SANDHYĀVANDANAM	7–00
	14. UTTAMA BRAHMA VIDYĀ SĀRAMU	35–00
	15. SRI VAIKHĀNASA MAHIMA MANJARI	18–00
	16. SRI VAIKHĀNASA SIDDHĀNTA LESĀDARSAM	25–00
	17. SRI VAIKHĀNASA UPĀKHYĀNAM	36–00
	18. ĀNANDA SAMHITA	95–00
	19. DHYĀNA MUKTĀVALI	12–00
	20. TRISATI	13–00
	21. ĀHNIKĀMRUTAM	27–00

★ In Devanagari script, All other books are in Telugu Script.

श्री श्रीनिवास परब्रह्मणे नमः
श्रीमद्विखनस महादेशिकेन्द्राय नमः

।। पारमात्मिकोपनिषत् ।।

श्रीवेंङ्कटेश मखिलेश मनन्त माद्यम्
सृष्टिस्थिति प्रलय हेतु महेतु मीड्यम् ।
श्रीपारमात्मिकमनु प्रतिपाद्यरूपम्
ध्यायामि मुक्तिदमहं चिदचिच्छरीरम् ॥

श्री वेंङ्कटेश करुणाऽमृत सेकलब्ध
वेदान्तदेशिक पदाय बुधोत्तमाय ।
वैखानसान्वय पयोधि सुधाकराय
श्री श्रीनिवास गुरवे महते नमोऽस्तु ॥

श्री लक्ष्मी वल्लभारम्भां विखनो मुनिमध्यमाम् ।
अस्मदायचार्य पर्यन्तां वन्देगुरुपरम्पराम् ॥
"श्रीगुरुभ्यो नमः हरिः ओम्"

शान्तिपाठः

(ओं सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवाव है ।
तेजस्वि नावधीतमस्तु । मा विद्विषावहै ।
ओं शान्तिः । शान्तिः ।। शान्तिः ।।।)

प्रथमोऽनुवाकः

ओं विष्णुस्सर्वेषामधिपतिः परमः पुराणः । परोलोकानामजितो जितात्मन् भवते भवाय स्वाहा ॥

सुसूक्ष्मः सार्व स्सर्वेषामन्तरात्मा तस्थुस्तस्थुषां जङ्गमो जङ्गमानाम् । विभुर्विभूणां विभवोद्भवाय स्वाहा ॥

ज्योतिर्वा पारमात्मिकं सार्वं विश्वभवं भवाय प्रभूतं प्राहिण्वन् । परम्पराय सुकृतं कृताय तस्मै वराय ईशिषे स्वाहा ॥

ईशो यस्माद्विततं वितत्य कं कं धृतं कामहुतो जुहोति । ककुदं ककुच्छित्वा भूयः पराय स्वाहा ॥

रायामीशो रहितो भरन्त्यै रां रां वहान्त्या आहितः । रायापतिं रां रां धरते धरित्र्यै रां वहतोद्वहाय स्वाहा ॥

योब्रह्मशब्दः प्रणवः प्रधानश्शब्द श्शब्दान्तरात्मा नित्यो वियत्तः प्रतरन्प्रकामम् । प्राजापत्यं प्रतरं प्रकुर्वन् भूयो भूत्यै अचरं चराय स्वाहा ॥

योवा त्रिमूर्तिः परमः परश्च त्रिगुणं जुषाणस्सकलं विधत्ते । त्रिस्त्रिस्त्रिधात्मा त्रिधात्रिधा वा विदधे समस्तं त्रिधा त्रिरूपं सकलं धराय स्वाहा ॥

यद्वा कृतममृतञ्चराणां यत्सर्वनिष्ठमजरं समस्तम् । यत्पश्यमानमात्माभिजुषाणमन्तस्सुषुप्त्यानभिगम्यमानाय स्वाहा ॥

कः कोशमङ्गे कुशलं विधाय साकृतं कृण्वतेग्र इदं सुकान्तम् । ककुद्वते कामचरं चराय स्वाहा ॥

यं यज्ञैर्मुनयो जुषन्ति यं देवाः परमं पवित्रं भविष्यन्त्यार्तिषु प्रणताः प्रधानाः । यं सूरयो जपन्तो योगिनः सूक्ष्मैः सुप्रदर्शनैः पश्यन्तीश्वराय स्वाहा ॥

द्वितीयोऽनुवाकः

योवा गविष्ठः परमः प्रधानः पुदं वा यस्य सत्त्वमासीत् । यस्योपरित्वं मुनयोऽनुपश्यन्ति तस्मै मुख्याय विष्णवे स्वाहा ॥

यो वा वायुर्द्विगुणोऽन्तरात्मा सर्वेषामन्तश्चरतीह विष्णो । सत्वं देवान् मनुष्यान् मृतान् परिसंजीवसे स्वाहा ॥

त्वमग्ने त्रिगुणो वरिष्ठः परंब्रह्म परंज्योतिः । सर्वेषां त्वं पालनाय हुतममृतं वहिष्यसे स्वाहा ॥

त्वं जीवस्त्वमापस्सर्वेषां जनिता त्वमाहारः । त्वं विष्णो श्रमापनुदाय चतुर्गुणाय स्वाहा ॥

भूमेर्वितन्वन् प्रतरन्प्रकामः पोपूयमानः पञ्चभिः स्वगुणैः । प्रसन्नै स्सर्वाणि मां धारयिष्यसि स्वाहा ॥

मनस्त्वं भूत्वा प्रतरन्प्रदोऽग्रे त्वत्तो भूतं सम्भावयिष्यसि । सर्वेषां कायाना महंमहते स्वाहा ॥

त्वं बुद्धिर्भूतानामन्तरात्मा पुण्यवतां पुण्येषु सज्जमानः । त्वं बुद्ध्या विचिन्वमानः पुण्यरूपाय स्वाहा ॥

यस्सूक्ष्मान् सञ्चरमाणान् भावाभावान् भव्या भव्यान् । कुर्वन्नात्मीय ममितो धुनोति धुरं वहिष्यसे स्वाहा ॥

यस्य वा भयाद्भगवानुत्तस्थे स्वयं सूर्यस्सत्यंकालं वहमानः । यस्मात्तेज आत्मीयं कृत्वा सर्वानस्मान् पालयिष्यसि स्वाहा ॥

यं त्वां सर्व पालनायाभिभूतं देवास्सर्वे पश्ये विचरन्ति । ते देवास्त्वमेव सर्वे माया मायैषाते स्वाहा ॥

तृतीयोऽनुवाकः

यस्त्वं भूत्वा पर्जन्यो बिभेति रन्ध्रे प्रजाभिराकृष्यमाणः । सत्यं कालं व्रतेन पालयन् हलादयिष्यसे स्वाहा ॥

कामो भूत्वा प्रजानामन्तरास्थितस्सर्वान् लोकान् हलादयन् जीवमानः । सन्दर्पणाय हरये पराय स्वाहा ॥

अङ्गादङ्गादनुप्राविशत्सर्वान् लोकान् संरक्षणाय । यो वा वसन् देवो मातरिश्वा स योऽस्माकं भूत्यै भूतये स्वाहा ॥

यो मोहयन् भूतानां सर्गाधिरक्षणाय । यस्सङ्कोचं स्सङ्कोचनाय भवता त्स्वाहा ॥

यो वा दशात्मा उपरि स्पृशन्वा देवानां ज्योति र्ज्योतिषामुत्तरः । स्वयं वा स्पृशन् ज्योतिर्ज्योतिषे स्वाहा ॥

यो ब्रह्मा ब्रह्मविदामात्मास्यादात्मचक्षुषाम् । भूतिर्भूतिमतां सुकृतं कृताय स्वाहा ॥

सारस्वतो वा एषदेवो यं न वा हयः पारमात्मिकः । भियोऽभयो वा सर्वं सुन्धुषे स्वाहा ॥

यो वा परं ज्योतिः परं सन्दधानः । परमात्मा पुरुषं सञ्जनयिष्यसे स्वाहा ॥

यो दोषश्चतुरश्चतुर्थश्चतुरः पदार्थान् । सर्वं लोकस्य सन्दधानस्सते सत्वमादधानाय स्वाहा ॥

यस्यैता ब्रह्ममूर्तयो बृहद्ब्रह्माणं ब्रह्म आदधानः । यं ब्रह्म ब्रह्मगुप्तये परम्पराय स्वाहा ॥

चतुर्थोऽनुवाकः

वाको वा अनुवाको वाकं वाकं संजुषमाणः । देवस्सस्वं स्वगुप्तये स्वयं ज्योतिषे ज्योतिषे स्वाहा ॥

द्वावेतौ पक्षी अचरं चरन्तौ नाधुरं व्यधुनीते । यश्चैकं भुनक्ति भोक्त्रे स्वाहा ॥

यो वा आयुः परमात्मानं मीढुषः पारम्पर्याप्तरः परायणः । परो लोकानां परमादधानः परतः पराय स्वहा ॥

यो वा तेजस्तेजसां तेजस्तेज आदधानः । सत्यस्तेजस्तेजसां तेजस्तेजस्तेजसे स्वाहा ॥

सह संपायास्त्वमाशिषमाशी भूताभूतम् । आशिषमाशीरासीराशीरनुभूमि स्वाहा ॥

यो वा संयोग स्संजुषमाण स्सन्धुस्सन्धुक्षणानाम् । संयोगं सन्दधानः पुण्यः पुण्यानां पुण्याय स्वाहा ॥

सहस्रं वायस्य वै वितानमादधान स्सहस्रं वा आशिषस्सासिकाः । सहस्रं यस्य वै सासिका स्सहस्रं सहस्राय स्वाहा ॥

स्वातिका गुप्तयो गुप्ति स्सत्यं सत्यानां सात्वंपदम् । तत्सत्वं सत्वमासी त्सात्वं सात्वं वै सात्त्वमादधानाय स्वहा ॥

सात्त्वं वा उद्रेकमासीद्यत्सत्त्वमुभयोरनुगोप्ता । तत्सत्वं सत्यं पदाय सत्याय स्वाहा ॥

सत्यो ज्योति स्सत्यान्तरात्मा सत्योद्योग स्सत्यस्सत्कर्म । सत्यं सत्य वितानमासीत्सत्यसत्याय स्वाहा ॥

पञ्चमोऽनुवाकः

सत्य स्सत्वं पुण्यमासीत्पुण्यो वा दैविकम् सत्यं सत्त्वमार्षं सत्यं सत्त्वं सत्पधाय स्वाहा ॥

सत्यो ज्योतिः सत्त्वं प्राणा स्सत्त्वाधारा स्सत्त्वं संधानः । सत्यस्सत्त्वं प्रकाशं ज्योतिर्ज्योतिषे स्वाहा ॥

कामी मुमामीशिषमीशिष स्सत्यमीशिष मीशिषाणाम् । तत्सत्यं सत्यरूपं सत्यं सत्याय सन्दधानाय स्वाहा ॥

आरिणीवा आरन्द आवारन्दो अयमारन्दः । मारन्द आनन्दते स्वाहा ॥

तत्सत्वो वा विष्णुरुद्योग स्सूर्योगोवा विष्णुर्विशत् । विश्वं विश्वं सन्दधान स्तद्विश्वं विष्णवे विश्वरूपाय स्वाहा ॥

तद्भूर्भूस्थं भूस्थो वा विश्वरूपस्तद्भूः प्राणस्संज्ञ्याख्यातः भूर्भूरासीद्भूरसि भुवोऽसि सुवरसि भूर्भूतये स्वाहा ॥

आपो वा आप आपोऽन्तरात्मा यो वेदो वेदानामाधारः । वेदान्तरात्मा सरसो रससंख्यातो रसं रसमासीद्रसाय स्वाहा ॥

त्रयी वा कामं त्रयीमयं त्रिगुणं त्रोतात्मकम् । त्रयीवा ज्योतिस्त्रिगुणं त्रिगुणात्मकं तस्मै त्रेताग्नये त्रिगुणाय स्वाहा ॥

द्वौ वा मुख्यौ मुख्याधारौ ससुखौ सानन्दौ ।स्मेरौ स्मेरायतौ सानन्दमानन्दते स्वाहा ॥

स एकैकं स्साधारः स्वाधिष्ठानो नाधिष्ठानः । कं कं पदे पदे पातः पादाय पादिते स्वाहा ॥

षष्ठोऽनुवाकः

स्वयमादि स्सर्वान्तरात्मा देवस्सस्वयं क्रिडात्मक मवासृजत् । यस्स्वयं लोकमवधार मवधारयन् स्वाहा ॥

यस्स्वयं सृष्टमात्मना गुप्त मनुसंवितान मचरं चरन्तम् । स्वयं क्रीडन्क्रीडयन्क्रीडान्तर मनुप्राविशत् स्वाहा ॥

स्वौजसा सर्वमादधाति यः पापीयांसमनुपद माहिंसत् । सुपुण्यं सुपुण्यात्मकं पुण्यवितानं दाधार देवाय स्स्वाहा ॥

क्ष्मामेकां सलिलावसन्नां श्रुत्वास्वनन्ती मनुसुपतन्तीम् । स्वयं भूत्वा वराहो वर उज्जहार तस्मै देवाय सुकृताय पित्रे स्वाहा ॥

यः कुन्धरमाणः कुन्धरान् कुन्धरतामित्यवोचत् । तां सानुमतो विदधत्स्वतेजसा तस्मै वरिष्ठाय वरदाय पित्रे स्वाहा ॥

यो वा पृथां प्रस्खलन्तीं प्रमृज्यामृजाङ्गीम् । यऊर्वोरुपदधात् तस्मै मुख्याय वरदाय पित्रे स्वाहा ॥

यां गामुशन्तीमुशनाभि पूर्णामारक्तनीला ममृतां रजन्तीम् । आलालयन् लालितकङ्कणांतां तस्मै प्रजेशाय वरदाय पित्रे स्वाहा ॥

प्रजापते नत्वदेता न्यन्यो विश्वा जातानिपरिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वहा ॥

यो धूर्धुरं धुर्धुरं धूर्वराणाम् । सुधूर्धूरसि धूर्धुराणां धूरसि धूर्वङ्गमे स्स्वाहा ॥

यो वा व्यहिंसी ज्जरयाजरन्तं तं दैत्यमुख्य ममृतात्मरूपम् । सुखुरं खुराणां किञ्चित्स्वनन्तं तस्मै नृसिंहाय सुरेशपित्रे स्वाहा ॥

सप्तमोऽनुवाकः

तपोनिधिं तपसां रयिंदं रयिमायुरङ्गं व्यसनाघ हिंस्रम् । सासिष्वसन्तं सवने सुवित्रे तस्मै सुरेशाय सुरवृन्दकर्त्रे स्वाहा ॥

यो वा नृसिंहो विजयं बिभर्षि राराजिमन्तं रयिदं कवीनाम् । साराजिमन्तं सजयं सहस्रं तस्मै सुयन्त्रे सुशेवधये शेवधये स्वाहा ॥

रयिः ककुद्मान् विदधद्विनष्टं रयिमद्विधानम् । तस्मै ककुत्रे विकटाय पित्रे स्वाहा ॥

राकामह ꣳ सुहवा ꣳ सुष्टुती हुवे श्रृणोतु नस्सुभगा बोधतुत्मना । सीव्यत्वपस्सूच्याऽच्छिद्यमानया ददातु वीर ꣳ शतदाय मुक्थ्य ꣳस्वाहा ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरोनामानि कृत्वाऽभिवदन् यदास्ते स्वाहा ॥

दिग्दोषा यस्य विदिशस्स्वकर्णौ द्यौरासवक्त्र मुदरं नभोवा । सासिष्मवाया स्वयमापदंतं तस्मै वरत्रे वरदाय कस्मै स्वाहा ॥

पद्मास्य वक्षाः परमस्सुपुण्यः पद्मा जनित्री परमस्य वासः । सूक्ष्मं सावित्रं स्वयमादधान स्सावित्र रूपं परमं सुपुण्य ꣳ स्वाहा ॥

यः पुण्डरीकः परमान्तरात्मा कमङ्गरूपं कमलं दधार । सरसे रसाय स्वाहा ॥

रयीणां पतिं बृहन्तं रारागमुक्तं गुरुं सनीकम् । तं रायो रूपं रयिभूतभूतं रयिमत्सुरमित्रे स्वाहा ॥

रायो पतत्रे रयिमादधात्रे रायो बृहन्तं रयिमत्सुपुष्टाम् । राराजिमन्तं रतये रमन्तं तं बिम्बवन्तं ककुदाय भद्रे स्वाहा ॥

अष्टमोऽनुवाकः

यत्सारभूतं सकलं धरित्रं मोदप्रायेणानुभूतमनुविद्धम् । सूक्ष्मस्सुरेश स्सकलं बिभर्ति तस्मै सुरेशाय सकलं सुपुण्यं ॐ स्वाहा ॥

फलो वा ऐष लोकाना मजरो महात्मा विश्वं यः पाति विमलोऽमलाख्यः । तस्मै वरत्रे वरदस्य पुष्ट्यै स्वाहा ॥

धूनो वहन्तो रतये रमन्तो पुंभूतिमन्तस्समयं सुषुन्मो । अं राजिमन्तं सकलस्य गुप्त्यै स्वाहा ॥

विश्वं बिभर्षि प्रसुरोरुदन्तं संराजिमन्तं सकलं प्ररूढम् । सनो वितत्य प्रहिणोतु पत्रे स्वाहा ॥

सोवा स्वरूप स्समदृक्समग्रो विधुदन्तु धन्यो विदधत्पदंवा । वियंति प्रकाशं बृहते रुहेण तंबिम्बवन्तं समदं समग्र ॐ स्वाहा ॥

भूर्भुवं वा भुवोवा सुवो वा किञ्चित्स्वनन्तं सुषुवे समस्तम् । सर्वस्य दातारं मजरं जरित्रे स्वाहा ॥

दाक्षायण्यां प्रसूतं समस्तं संङ्कोचयित्वा सकलं वितानम् । संवासयन्मे सकलं वरिष्ठं तस्मै प्रजेशाय धुरन्धराय स्वाहा ॥

आशास्समस्ताः प्रतरन्वन्तस्ता स्तावसेद्या कमला समस्ता । सा मे गृहे वा समधत्त पुष्टिं ॐ स्वाहा ।

यो जङ्गमानां सकलं बिभर्षि सर्वं वियद्वा विचरेत शक्ष्यन् । तन्नोर्जि वेवपुष्यन्त्यजस्रं ॐ स्वाहा ॥

यो वा दशानां प्रसूतास्समस्ता स्तांस्तान्दधानास्समयात्सुबीजाः । शब्दातिरिक्त्यै स्वबलं बलाय स्वाहा ॥

नवमोऽनुवाकः

चत्वारो दोषाः प्रहरन्ति यस्य सर्वस्य गोप्त्रे सरसायुधाम्ने । सोमस्य पुण्यं रयिमत्प्रवृद्ध्यै स्वाहा ॥

वक्षोवसत्यस्य वरां वरिष्ठे वाकन्दधाना ववृधे समस्तम् । तस्मै वरिष्ठाय परप्रवृद्ध्यै स्वाहा ॥

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं ँ स्वाहा ॥

विष्णुर्वरिष्ठो वरदानमुख्यो यो विश्वऋषीन् ध्यायन्नुकुर्वन् । विश्वं हीहिषद्वयदधत्तमत्र तद्विष्णवेयाः प्रभविष्णवेया अमितं भरत्रे स्वाहा ॥

अब्जोऽजुषन्तः प्रपदेत्पतन्तः पूंपूंपुषन्तः पुनर्यः प्रवालः कं कं जनित्रे समतेजसन्ते स्वाहा ॥

मामात्मगुप्तां वहतेस्मभूत्यै तां राजिमन्तां सुधूर्धूरयन्तीम् । धूरसिधुवाय स्वाहा ॥

यं चिन्तयन्तो निगमान्तरूपं ये विश्वरूपं परमात्म रूपम् । तं विन्दमानां सकलं व्रजन्तीं तं देवमुख्यं सुरतं भवाय स्वाहा ॥

पुण्यां च पुण्यः पुरुषे पुरग्रे तां राजिमन्तां निशिचोदितानाम् । विदधाति पुष्ट्यै हरन्पराय स्वाहा ॥

सो नो भूतो योवाऽमृतात्मा सुपुष्टिमस्मत्पितरं पवित्रम् । सोनोस्तु भूत्यै कमलावराय स्वाहा ॥

सत्वेवनित्यं सकलास्समूर्तय स्सुरतास्त्वनन्ताः । ते जीजयन्तो वियति क्षयाणां तत्तत्सवित्रे हरतेहराय स्वाहा ॥

दशमोऽनुवाकः

या गा॒ वरि॑ष्ठा सह॑सूर्धरि॒त्री व॒सुं व॑सु॒ वै व॑सु॒नीह भद्रा॑ । रेरी॑जयन्तो रजि॒तं र॑जते॒ स्वाहा॑ ॥

वा॒युर॑न्तरा॒त्मा वह॑तीसमस्त स्सपु॑ण्य दे॒वेति॒ स सू॑रिमु॒क्तः । सूरि॒स्सुरा॑णां सु॒रसो॑प्यसु॒न्दस्समू॑ह्य दे॒वाय॒ वर॑दाय पि॒त्रे स्वाहा॑ ॥

सर्वो॑परिष्टा॒ दधि॑तिष्ठताऽत्मा यस्यो॑परिष्टा॒त्परम॑स्समु॒क्तः । तं नी॑रजन्त मनु॒सं॑पराय॒ स्वाहा॑ ॥

तम॒ स्सर्व॑भूत॒ मधु॑नोद्वरेण्य स्तं॑ स॒त्वरू॒पं सक॑लं प्रकाश्य । सं॑के॒शय॒न् सुष्टि॒ निमि॑त्तये॒य स्तस्मै॒ परं॑ब्रह्म॒णे पर॑ं॒ज्योति॑षे स्वाहा॑ ॥

ज्योति॒र्ज्यो॑तिषां॑ ज्योति॒रोजो॒ बलं॑ स॒त्वं स॒त्वात्म॑कं॑ सं॒ज्योति॑ रि॒त्थम् । तस्मै॒ सू॒क्ष्म सू॒क्ष्माय॒ ते॑ज॒से स्वाहा॑ ॥

स॒त्त्वं स॒त्त्वात्म॑कं॑ वा रजो॑ रज॑स आ॒त्मकम् । तम॒स्तम॑स आधारस्साकृ॒तं॑ ते॑ निरीश्वर मीश्वराय॒ स्वाहा॑ ॥

अनि॑र्भिण्णं॒ यस्ये॒दमा॑सीदासीदु॒दकमा॒त्मकम् । यस्यो॒दावो॑ऽधनर्धमुच्च मुच्चै॑ रुरु॑गाय॒ स्वाहा॑ ॥

यस्ये॒च्छा लो॒के वा॒ प्रजा॑यति॒र्लोके यन्नै॒वासी॒तन्नै॒वासी॑त् । यद्वा॑ सं॒जा॒तं यत्सर्वमीश॑ मी॒शिषे॒ स्वाहा॑ ॥

यो वेदा॒दिः परमः॑ परो॒ब्रह्मा त्रिमा॒त्र स्त्रयी॑मूर्तिकः । शब्द॑श्शब्दा॒तिगः॑ पर॑ं॒ब्रह्म॒णे परं॒ ज्योति॑षे स्वाहा॑ ॥

यो वा॑ व्यक्तं॑ सक॑लं प्रवृ॒द्ध्यै यदि॒दं सर्व॑मासीत् । सा॒नन्दं॑ सा॒कृ॒तं॑ तं॑ ह॒रन्प॑राय॒ स्वाहा॑ ॥

एकादशोऽनुवाकः

यो वा भूतेर्भूतिरासीत्सावानन्दं प्रत्यानन्दम् । संजुषन्वृजामि सत्यं सत्याय स्वाहा ॥

सत्यस्सत्यस्थस्सत्यलोकस्थस्सत्य स्सञ्जनित्रमासीत् । सत्यं सत्याय रंहसे स्वाहा ॥

ऋत ँ सत्य ममितं पुराण मादिं जनित्र ममृतं सुरेन्द्रम् । संज्योतिषां जुषमाणं जुषस्व स्वाहा ॥

अं राजिमन्तं सकलस्यगुप्तिं सोमंजुषन्त ममृतं बिभर्ति । रयिमत्सुपुष्टिं गुणवन्तमत्र तस्मै सुपुण्याय वरदाय पित्रे स्वाहा ॥

मामात्मगुप्तां सत्यस्य सर्वस्य वितानरूपां संजूजुषन्तीं परमां पवित्राम् । सन्तारयन्तीं स्वयमप्रमत्तां संयोजयित्रे वरदाय पित्रे स्वाहा ॥

"पारमात्मिकोपनिषत्समाप्ता"

हरिः ओम्

నిత్యం గృహే దేవాయతనేవా
భక్త్యా భగవన్తం నారాయణ మర్చయేత్
తద్విష్ణోః పరమం పదం గచ్ఛతీతి విజ్ఞాయతే

- శ్రీ వైఖానస కల్ప సూత్రే చతుర్థః ప్రశ్నః

శ్రీ మరీచి గ్రంథమాల ప్రచురణలు

శ్రీ వైఖానస దివ్య సిద్ధాన్త వివర్ధినీ సభ, తిరుమల

		రూ.	పై.
1.	వైఖానసము - మొదటి సంపుటము (శ్రీ వైఖానసాగమ వివరణ)	2	00
2.	డిటో - రెండవ " (శ్రీ వైఖానస దివ్య సిద్ధాన్త వివరణ)	2	50
3.	డిటో - మూడవ " (శ్రీ వైఖానస కల్ప సూత్ర వివరణ)	3	00
4.	డిటో - నాలుగవ " (శ్రీ భగవదర్చా కైంకర్య వివరణ)	3	00
5.	డిటో - అయిదవ " (సదాచార వివరణ)	3	50
6.	ఉత్తమ బ్రహ్మ విద్యాసార సంగ్రహః	2	00
7.	శ్రీ విఖనస స్తోత్రములు	12	00
8.	పారమాత్మికోపనిషత్	5	00
9.	శ్రీ వైఖానస పత్రిక సంవత్సర చందా	70	00

శ్రీ విఖనస ట్రస్టు ప్రచురణలు

తిరుమల

1.	ఆంధ్రప్రదేశ్‌లో - అర్చకత్వము సుప్రీంకోర్టు తీర్పు (19-3-91)	రూ. 5/-
2.	నవగ్రహ శాంతి (శ్రీ వైఖానస కల్ప సూత్రోక్త విధానము)	రూ. 25/-
3.	ఖగోళ శాస్త్ర విజ్ఞానము (A Handbook on Astronomy)	రూ. 30/-
4.	సుముహూర్త రత్నావళి (శ్రీ వైఖానస శాస్త్రోకముగా)	రూ. 20/-